# Shakinisadashivarchanam

# શાકિનીસદાશિવાર્ચનમ્

## Document Information

Text title : Shakinisadashivarchanam

File name : shAkinIsadAshivArchanam.itx

Category : devii, ShaTchakrashakti, shiva, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator

muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# શાકિનીસદાશિવાર્ચનમ્

અથ પઞ્ચષષ્ટિતમઃ પટલઃ

શ્રીઆનન્દભૈરવી ઉવાચ

અથ કાન્ત પ્રવક્ષ્યામિ સમુદાયફલોદયમ્ ।
કણ્ઠામ્ભોજસ્ય વર્ણાનાં ધ્યાનં મન્ત્રં શ‍ૃણુ પ્રભો ॥ ૬૫-૧॥

શાકિનીસહિતં નિત્યં પૂજયિત્વા સદાશિવમ્ ।
મૂઢોઽપિ યોગિનાં શ્રેષ્ઠઃ કિમન્યે ધ્યાનયોગિનઃ ॥ ૬૫-૨॥

ધ્યાત્વા સમ્પૂજયેદ્યસ્તુ સોઽભીષ્ટં ફલમાપ્નુયાત્ ।
તતો ધ્યાનં પ્રવક્ષ્યામિ વીરનાથ શ‍ૃણુ પ્રભો ॥ ૬૫-૩॥

આદૌ શ્રીશાકિનીધ્યાનં પશ્ચાદ્ ધ્યાનં સદાશિવે ।
દ્વયોરભેદબુદ્ધ્યા ચ કામજેતા સ્વયં ભવેત્ ॥ ૬૫-૪॥

વન્દે નિત્યાં સુશીલાં ત્રિભુવનવરદાં શાકિનીં પીતવસ્ત્રાં
વેદાદ્યાં વેદમાતાં સુખમયલલિતાં વેદહસ્તોજ્જ્વલાઙ્ગીમ્ ।
ધ્યાયે પીયૂષધારામલઘટસુધયા સ્નિગ્ધદેહાં હસન્તીં
માયાં શમ્ભોર્લલાટે વિધુકિરણકરાં શ્રીસદાનન્દયુક્તામ્ ॥ ૬૫-૫॥

અમ્ભોજાસ્ત્રાદિમુદ્રાસિવરદજટા ધારયન્તીં કરાલં
શ્યામાં પીનસ્તનાઢ્યાં ત્રિનયનકમલાં પ્રેતલિઙ્ગાસનસ્થામ્ ।
સર્વાઙ્ગાલઙ્કૃતાં શ્રીં વિધુશતવદનામ્ભોજશોભાં વહન્તીં
શમ્ભોરાનન્દકર્ત્રીં ચરમગુણપદાં સ્થૂલસૂક્ષ્મસ્વરૂપામ્ ॥ ૬૫-૬॥

એવં ધ્યાયેન્મહાયોગી સ્થૂલસૂક્ષ્મસ્વરૂપિણીમ્ ।
અભેદ્યભેદકરણીં શઙ્કર પ્રેમવલ્લભ ॥ ૬૫-૭॥

યા વિદ્યા વાગ્ભવાઢ્યા હરિવધુકમલા કેવલે નિષ્કલન્તે
માયાલક્ષ્મીસ્ત્રિકૂટં શશિમુખિતદધઃ શાકિની ક્ષેત્રપાલમ્ ।
વક્ષદ્વન્દ્વં ત્રિકૂટં વધુમધરમિવાસિદ્ધિમિષ્ટાં વિધેહિ

સ્વાહાન્તોઽયં મહેશત્રિભુવનભવિકાહ્લાદહેતોઃ પ્રકાશઃ ॥ ૬૫-૮॥

પ્રણવં પૂર્વમુદ્ધૃત્ય વાગ્ભવં તદનન્તરમ્ ।
શાકિની ત્વં તદન્તે તુ મમ દોષાન્ વિનાશય ॥ ૬૫-૯॥

યુગલં વહ્નિકાન્તાં ચ મન્ત્રાર્થાઃ સારદાઃ સ્મૃતાઃ ।
કામરાજં સમુદ્ધૃત્ય હિરણ્યાક્ષિ સનાતનિ ॥ ૬૫-૧૦॥

શાકિન્યન્તે મહામાયે માયાવહ્નિશ્રિયા યુતમ્ ।
એષા મન્ત્રાત્મિકા વિદ્યા કણ્ઠામ્ભોજપ્રકાશિની ॥ ૬૫-૧૧॥

શાકમ્ભરી મહાવિદ્યા તસ્ય વામે વિભાતિ ચ ।
તસ્ય મન્ત્રં પ્રવક્ષ્યામિ જ્ઞાત્વૈવ યોગવિત્ પ્રભુઃ ॥ ૬૫-૧૨॥

મહામન્ત્રસ્ય માહાત્મ્યં કથિતું નૈવ શક્યતે ।
ભાવમાત્રેણ સિદ્ધિઃ સ્યાત્ કિં પુનર્મોક્ષસાધનમ્ ॥ ૬૫-૧૩॥

વિદ્યાં કામકલાં વિચિત્રવસનાં પદ્માસનસ્થાં શિવાં
કામાખ્યાં સકલાન્ સ્વરાન્ ત્રિજગતાં શાકૈર્મહાયોગિની ।
નિત્યં યા પરિપાલ્યતે ભગવતીં શાકમ્ભરીં તાં ભજે
સા યોગાધિપ-રક્ષકા નિશિ દિશિ શ્રીકણ્ઠપદ્મે પ્રભા ॥ ૬૫-૧૪॥

અદ્યાપિ પ્રિયકણ્ઠપદ્મનિકરે સમ્ભાતિ શાકમ્ભરી
વિદ્યાવાક્કમલાયુતં સ્મિતમુખિ પ્રાન્તે ચ શાકમ્ભરિ ।
વહ્નિર્વારુણવાયુબીજમનલદ્વન્દ્વં હિ વક્ષદ્વયં
વહ્નિપ્રેમકલાન્વિતો મનુવરઃ સાક્ષાજ્જગત્ક્ષોભકૃત્ ॥ ૬૫-૧૫॥

શાકમ્ભરીં મહામાયાં પૂજયેદ્ દ્વારદેવતામ્ ।
તદન્તે સર્વદેવાશ્ચ શક્રાદીન્ પરિપૂજયેત્ ॥ ૬૫-૧૬॥

ધ્યાત્વા ચ શાકિનીં દેવીં શાકમ્ભર્યાશ્ચ દક્ષિણે ।
પૂજયેત્ પરયા ભક્ત્યા પૂર્વોક્તવિધિના પ્રભો ॥ ૬૫-૧૭॥

શાકમ્ભરીં ત્રિનયનાં સૂર્યેન્દુવહ્નિયોજિતામ્ ।
રક્તપદ્મસ્થિતાં શ્યામાં વેદબાહુશ્રિયોજ્જ્વલામ્ ॥ ૬૫-૧૮॥

વરાભયકરાં ખડ્ગકપાલકમલાન્વિતામ્ ।
નાનાલઙ્કારશોભાઙ્ગી મુક્તકુન્તલભૂષિતામ્ ॥ ૬૫-૧૯॥

પ્રસન્નવદનામ્ભોજસ્મિતહાસ્યવિરાજિતામ્ ।

સાધકાભીષ્ટદાં નિત્યાં મહાવિદ્યાં ભજામ્યહમ્ ॥ ૬૫-૨૦॥

તતો માનસપૂજાઞ્ચ ધ્યાનાન્તે તુ સમાચરેત્ ।
પુનર્ધ્યાનં તતઃ કૃત્વા ચિત્તાવાહનમાચરેત્ ॥ ૬૫-૨૧॥

પાદ્યાદ્યૈઃ પૂજયેન્નિત્યં ભક્ત્યા ચ યોગસિદ્ધયે ।
તતો જપેચ્છતં વાપિ ચાષ્ટોત્તરસહસ્રકમ્ ॥ ૬૫-૨૨॥

એવં લક્ષસમાપ્તે તુ કણ્ઠે દેવીં પ્રપશ્યતિ ।
હોમાદીન્ ક્રમશઃ કુર્યાદ્ બ્રાહ્મણાનાં તુ ભોજનમ્ ॥ ૬૫-૨૩॥

તદન્તે શાકિનીપૂજા પ્રથમે વાપિ કારયેત્ ।
તત્પ્રકારં શ‍ૃણુ પ્રાણવલ્લભે કામસુન્દરિ ॥ ૬૫-૨૪॥

આદૌ જલં શોધયિત્વા હસ્તૌ પાદૌ ચ વિગ્રહમ્ ।
ક્ષાલયિત્વા દ્વિરાચમ્ય મૂલમન્ત્રેણ સાધકઃ ॥ ૬૫-૨૫॥

શિખાબન્ધનમાકૃત્ય ચાસનં પરિશોધયેત્ ।
તતોઽર્ઘ્યસ્થાપનં કૃત્વા પીઠં નિર્માય યત્નતઃ ॥ ૬૫-૨૬॥

પીઠચક્રં શોધયિત્વા પીઠપૂજાં સમાચરેત્ ।
તતો ધ્યાનં ભૂતશુદ્ધિં ન્યાસજાલં સમાચરેત્ ॥ ૬૫-૨૭॥

પુનઃ પ્રાણાયામયુગ્મં કૃત્વા દેહં દૃઢં નયેત્ ।
તતો ધ્યાનં માનસાર્ચાં મુદ્રાદર્શનમેવ ચ ॥ ૬૫-૨૮॥

તતઃ પાદ્યં તથાર્ઘ્યં તુ ચારુશઙ્ખેન કારયેત્ ।
આચમનીયં તતઃ સ્નાનં પુનરાચમનં તથા ॥ ૬૫-૨૯॥

ગન્ધં પુષ્પાણિ સર્વાણિ બિલ્વપત્રાણિ દાપયેત્ ।
નિજાવરણદેવાંશ્ચ પૂજયિત્વા ક્રમેણ તુ ॥ ૬૫-૩૦॥

ધૂપદીપૌ નિવેદ્યાથ નૈવેદ્યં પાનકં તતઃ ।
પુનરાચમનં દત્વા બલિદ્રવ્યાણિ દાપયેત્ ॥ ૬૫-૩૧॥

બલિં દત્વા જપેન્મન્ત્રં સહસ્રં વા શતાષ્ટકમ્ ।
દિવસે યજ્જપં કુર્યાદ્રાત્રૌ તજ્જાપ્યમાશ્રયેત્ ॥ ૬૫-૩૨॥

જપં સમર્પયેદ્ વિદ્વાન્ ગુહ્યાતિગુહ્યમન્ત્રકૈઃ ।
પ્રાણાયામં ત્રિષટ્કૃત્વા વન્દનં ચ પ્રદક્ષિણમ્ ॥ ૬૫-૩૩॥

સ્તોત્રઞ્ચ કવચં નિત્યં સહસ્રનામમઙ્ગલમ્ ।
પઠેદ્ ભક્ત્યા કણ્ઠપદ્મે કાયકલ્પનકૃન્નરઃ ॥ ૬૫-૩૪॥

એવં વિધિવિધાનેન પૂજયિત્વા સદાશિવમ્ ।
અસ્મિઞ્છાસ્ત્રે ક્રિયા ગુપ્તા ગુપ્તનારી પ્રપૂજનમ્ ॥ ૬૫-૩૫॥

અથવા મનસા સર્વં પૂજાયાગજપં ચરેત્ ।
યથા દેવ્યાસ્તથા શમ્ભોર્જપયાગઃ સમીરિતઃ ॥ ૬૫-૩૬॥

એવં ક્રમેણ પૂજ્યાશ્ચ બાહ્યસ્થા મુનયઃ ક્રમાત્ ।
પૂજ્યા વર્ણકલા નાથ તદ્બાહ્યસ્થાનં પ્રપૂજયેત્ ॥ ૬૫-૩૭॥

એવં હિ માસકાર્યેણ વરં સિદ્ધિં સમાપ્નુયાત્ ॥ ૬૫-૩૮॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધમન્ત્રપ્રકરણે
ભૈરવીભૈરવસંવાદે શાકિનીસદાશિવાર્ચનં નામ
પઞ્ચષષ્ટિતમઃ પટલઃ ॥ ૬૫॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Shakinisadashivarchanam*
pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*